# २७. पादुका सहस्रम् - रेखा पद्धतिः (१०)

सूचयन्तीं स्वरेखाभि रनालेख्य सरस्वतीम् ।
अलेखनीय सौन्दर्या माश्रये शौरि पादुकाम् ॥ २७.१॥ ८११॥

मणिमौलि निघर्षणात् सुराणां
वहसे काञ्चन पादुके विचित्रम् ।
कमलापति पादपद्म योगात्
अपरं लक्षण माधिराज्य सारम् ॥ २७.२॥ ८१२॥

अभितो मणिपादुके स्फुरन्त्याः
तव रेखा वितते स्तथा विधायाः ।
मुरवैरि पदारविन्द रूढैः
अनुकल्पायित माधिराज्य चिह्नैः ॥ २७.३॥ ८१३॥

रेखया विनमतां दिवौकसां मौलिरत्न मकरी मुखोत्थया ।
पादुके वहसि नून मद्भुतं शौरिपाद परिभोग लक्षणम् ॥ २७.४॥ ८१४॥

त्रिदश मकुट रत्नोल्लेख रेखापदेशात्
पारिणमयसि पुंसां पादुके मूर्ध्नि लग्ना ।
नरक मथन सेवा सम्पदं साधयित्री
नियति विलिखितानां निष्कृतिं दुर्लिपीनाम् ॥ २७.५॥ ८१५॥

पदकमल तलान्तः सम्श्रिता न्यातपत्र-
ध्वज सरसिज मुख्या न्यैश्वरी लक्षणानि ।
अवगमयसि शौरेः पादुके मादृशानां
उपरि परिणतैः स्वैर्देवि रेखाविशेषैः ॥ २७.६॥ ८१६॥

स्नाता पदावनि चिरं परिभुज्य मुक्ता
पादेन रङ्गनृपतेः शुभलक्षणेन ।
रेखान्तरै र्नवनवै रुपशोभसे त्वं
संस्कार चन्दन विलेपन पङ्कलग्नैः ॥ २७.७॥ ८१७॥

भक्त्या मुहुः प्रणमतां त्रिदशेश्वराणां
कोटीर कोटि कषणा दुपजायमानैः ।
आभाति शौरि चरणा दधिकानुभावा
रेखाशतै स्तव पदावनि काऽपि रेखा ॥ २७.८॥ ८१८॥

पादावनि प्रतिपदं परमस्य पुंसः
पादारविन्द परिभोग विशेष योग्या ।
स्वाभाविकान् सुभग भक्ति विशेष दृश्यान्
रेखात्मकान् वहसि पत्रलता विशेषान् ॥ २७.९॥ ८१९॥

रेखापदेशतस्त्वं प्रशमयितुं प्रलय विप्लवाशङ्काम् ।

वहसि मधुजित्पदावनि मन्ये निगमस्य मातृकालेख्यम् ॥ २७.१०॥ ८२०॥

इति कवितार्किक सिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य श्रीमद्वेदान्ताचार्यस्य कृतिषु श्रीरङ्गनाथ पादुकासहस्रे रेखापद्धतिः सप्तविंशी ॥